कालकर्णी ग्रहग्रहाः । ज्वरापस्मारविस्फोटतृतीयकचतुर्थकाः । सर्वे प्रशममायान्ति शिवतीर्थजलोक्षणात् । ज्ञानोदतीर्थपानीयैर्लिङ्गं यः स्नपयेत् सुधीः । सर्वतीर्थोदकैस्तेन ध्रुवं संस्नपितं भवेत् । ज्ञानरूपोऽहमेवात्र द्रवमूर्त्तिं विधाय च । जाड्यविध्वंसनं कुर्य्यां कुर्य्यां ज्ञानोपदेशनम्" "इति दत्त्वा वरान् शम्भुस्तत्रैवान्तरधीयत । कृतकृत्यमिवात्मानं सोऽप्यमंस्त त्रिशूलभृत् । ईशानो जटिलो रुद्रस्तत्पीत्वा परमोदकम् । अवाप्तवान् परं ज्ञानं येन निर्वृतिमाप्नवान्" ।

**ज्ञानसाधन** न० ६त०। १इन्द्रिये २तत्त्वज्ञानसाधने श्रवणमनननिदिध्यासनादौ च ।

**ज्ञानापोह** पु० ६त०। ज्ञानजसंस्कारनाशजे विस्मरणे।

**ज्ञानाभ्यास** पु० ६त०।१ज्ञानसाधनश्रवणाद्यावृत्तौ "तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम् । एतदेकपरत्वञ्च ज्ञानाभ्यासं विदुर्बुधाः" इत्युक्तलक्षणे २मननादौ च । बोधाभ्यासादयोऽप्यत्र । "सर्गादावेव नोत्पन्नं दृश्यं नास्त्येव तत्सदा । इदं जगदहञ्चेति बोधाभ्यासं विदुः परम्" वेदान्तशा० ।

**ज्ञानासन** न० "अथान्यद्रासनं कृत्वा सर्वव्याधिविनाशनम् । योगाभ्यासी भवेत् क्षिप्रं ज्ञानासनप्रसादतः । दक्षपादोरुमूले तु वामपादतलं तथा । दक्षपादतलं दक्षपार्श्वे संयोज्य धारयेत् । एतज्ज्ञानासनं नाम ज्ञानविद्याप्रकाशकम् । निरन्तरं यः करोति तस्य ग्रन्थिः स्लथा भवेत्" इति रुद्रयामलोक्ते आसनभेदे ।

**ज्ञानिन्** त्रि० ज्ञानमस्त्यस्य इनि । १ज्ञानयुक्ते ब्रह्मसाक्षात्कारयुक्ते "चतुर्विधा भजन्ते माम्—आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ !"। "ज्ञानिनामपि सर्वेषां मद्गतेनान्तरात्मना" गीता २बोधयुक्तमात्रे त्रि० ज्ञानिनो मनुजाः सत्यं किन्तु ते न हि केवलम् । यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः" देवीभा०। ज्ञान+अस्त्यर्थे मतुप् मस्य वः। ज्ञानवदप्यत्रार्थे "बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते" गीता । उभयत्र स्त्रियां ङीप् ।

**ज्ञानेन्द्रिय** न० ज्ञायतेऽनेन ज्ञा—करणे ल्युट् ज्ञानसाधनमिन्द्रियम् कर्म० । १ज्ञानसाधने इन्द्रिये श्रोत्रादौ "ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाश्च नासिका । ज्ञानेन्द्रियाणां विषयाः" शा० ति० । इन्द्रियशब्दे विवृतिः । "एतान्याकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक्२ क्रमेणोत्पद्यन्ते" यथोक्तं देवीभागवते । "पञ्चभूतस्थसत्त्वांशैः श्रोत्रादीनां समुद्भवः । ज्ञानेन्द्रियाणां राजेन्द्र ! प्रत्येकमिति निश्चितम्" । क्रमशो दिग्वातार्कप्रचेतोऽश्विनो ज्ञानेन्द्रियाणां देवताः । शब्दस्पर्शरूपरसगन्धाश्च क्रमशो ज्ञानेन्द्रियाणां विषयाः ।

**ज्ञापक** त्रि० ज्ञा—णिच् ण्वुल् । बोधके ।

**ज्ञापन** न० ज्ञा—णिच्—ल्युट् । बोधने ।

**ज्ञीप्सा** स्त्री ज्ञप—सन्—भावे अ । ज्ञातुमिच्छायाम् ।

**ज्ञीप्स्यमान** त्रि० ज्ञप—सन्—कर्मणि शानच् । ज्ञातुमिष्यमाणे । "स्वाधत्त ङस्याशयं ज्ञीप्स्यमानः" पा० ।

**ज्ञेय** त्रि० ज्ञा—कर्मणि यत् । बोद्धव्ये । यथा व्याकरणादि पाणिन्यादेर्ज्ञेयैकदेशार्थमपि" शा० भा० । २ज्ञातुं योग्ये ब्रह्मणि च । "ज्ञेयं यत् तत् प्रवक्ष्यामि यद् ज्ञात्वाऽमृतमश्नुते । अनादिमत् परं ब्रह्म न सत् तन्नासदुच्यते । सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् । सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति । सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् । असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च । बहिरन्तश्च भूतानामचरं चरमेव च । सूक्ष्मत्वात् तदविज्ञेयं दूरस्थं चान्तिके च तत् । अविभक्तं विभक्तेषु विभक्तमिव च स्थितम् । भूतभर्त्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च । ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते" । "ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम्" गीता ।

**ज्या** जरायां क्र्या० प० पर० अक० अनिट् । जिनाति अज्यासीत् । जिज्यौ जिज्यतुः । जिनः ।

**ज्या** स्त्री ज्या—अङ्ग्रा० यक् नि० । १धनुर्गुणे अमरः तस्य निरन्तराकर्षणेन धनुषो जराकरणात्तथात्वम् । २वसुधायां तस्याः प्रतिक्षणं क्षीयमाणत्वात् तथात्वं ३मातरि स्वप्रसवेन तस्याः वयोहानेस्तथात्वम् मेदि० । गोलक्षेत्रान्तर्गते धनुराकारक्षेत्रस्थकेन्द्रस्थानात् उभयपार्श्वसंलग्ने ४सरलरेखाभेदे । क्रमज्याशब्दे २३०२ पृ० जीवाशब्दे ३१३५ पृ०दृश्यम् । तास्च चतुर्विंशतिसंख्यिकास्तत्र क्रमज्याशब्दे उक्तावशिष्टा उत्क्रमज्यामानसंख्याङ्काश्च सू० सि० उक्ता यथा "मुनयोरन्ध्रयमलारसषट्का मुनीश्वराः । द्व्यष्टैकारूपषड्दस्राः सागरार्थहुताशनाः । खर्तुवेदानवाद्रार्थादिङ्नगाश्चार्थकुञ्जराः । नगाम्बरवियच्चन्द्रारूपधरणिशङ्कराः । शरार्णवहुताशैकाभुजङ्गाक्षिशरेन्दवः । नवरूपमहीध्रैकागजैकाङ्कनिशाकराः । गुणाश्विरूपनेत्राणि पावकाग्निगुणाश्विनः । वस्वर्णवार्थय-